श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

## सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीलक्ष्मीहयवदननक्षत्रमालिका ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

*The printed source of this stotra (Kadamba Mālā, pp. 243–252) contains numerous typographical errors. A best attempt has been made to correct them.*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीहयवदननक्षत्रमालिका ॥

हयग्रीवकृपापात्रम् आत्रेयकुलभूषणम्।
सेवाख्यस्वामिनं सेवे बुधन्वपरदेशिकम्॥

## अश्विनी

अश्वपूर्वया श्रिया समेतमश्वकन्धरं
अश्विनीसमानरूपमश्वभोग्यमुत्तमम्।
विश्वसुन्दरं विशुद्धरत्नशोभिवक्षसं
विश्वमश्ववेगतो विभावये मम प्रभुम्॥ 1 ॥

## अपभरणी

भारते सभारते विभातवैभवं विभुं
भारदूरकारि-वारितारि-वारिजेक्षणम्।
सारभारतारवादिहेतुहेषितं हयं
सारतस्समाश्रये भरण्यतो ममोरसि॥ 2 ॥

## कृत्तिका

कृत्तिकाजमुख्यदेववन्दिताङ्घ्रिपङ्कजं
वृत्तिकारणं विशां विवर्णवादवारणम्।
भृत्यकामितार्थदानकृत्यजातमद्भुतं
सत्यकाममन्वहं भजे तुरङ्गकन्धरम्॥ 3 ॥

## रोहिणी

रोहिणीशभासमानभासमेतवल्लभा-
रोहणेन भासमानदोर्युगान्तर प्रभो।
त्वत्कृपा प्ररोहणी तुरङ्गवक्त्र नम्रता-
रोहणी विभातु ते कटाक्षसन्ततिस्सदा॥ 4 ॥

## मृगशीर्षम्

मेध्यतां मृगेषु याति सैन्धवो हि केवलं
शीर्षतो मृग प्रभो विराजसे महीतले।
काममस्तु केसरी तथैव यापि कापि वा
देवता मुदे न मे विभाति शीर्षभेदतः॥ 5 ॥

## आर्द्रा

आर्द्रया दृशा विलोकय त्वमक्षिसुन्दर
प्रार्थये त्वराभिराम दिव्यवाजिकन्धर।
अर्दितोऽहमस्मि भूरिकर्मदाववह्निना
बन्धुराङ्ग संसृतौ विभासि बन्धुरेव मे॥ 6 ॥

## पुनर्वसु

वेदराशिमात्मजाय नाभिजन्मने ददौ
वेदलोपतः पुनर्वसु प्रदाय दुःखिने।
बोधनावनादिना पुनः पुनः कृपानिधे
देहि मेऽपि वाजिवक्त्र सर्वदा पुनर्वसु॥ 7 ॥

## पुष्यम्

पोष्यवर्गमेतदेव भूतलं तव प्रभो
पोषकस्त्वमात्मनां विराजसे हयानन।

पुष्टमस्तु सेवनं तथार्चनं सुकीर्तनं
पुष्यजातसात्त्विकोपमं विधेहि सेवकम् ॥ 8 ॥

## आश्लेषा

श्लेष एष आसमन्ततः श्रिया धिया तवा-
श्लेषमेव कर्मणां तनोति पाप्मनां नृणाम्।
श्लक्ष्णमस्तु दर्शनं विशिष्टमस्तु रक्षणं
क्लिष्टताविदूर वाजिकन्धराव मां प्रभो ॥ 9 ॥

## मखा

वाजिमेधतो विशिष्टतां प्रयान्ति सन्मखाः
वाजिवक्त्र दिव्यरूपसेवनं सुखप्रदम्।
वाजपेयमुख्ययागकर्तृशिष्टसन्नुतं
वाजिसंहितादिगीतमाश्रये जयप्रदम् ॥ 10 ॥

## पूर्वफल्गुनी

पूर्वफल्गुनीतिमोहविक्लवाय निश्चितं
फल्गुनाय सर्वसारगीतमाह माधवः।
नीरपूरदिव्यपद्मसद्मना त्वया विभो
पूर्वमेव भाषितं बभाण पार्थसारथिः ॥ 11 ॥

## उत्तरफल्गुनी

फल्गुनी यदुत्तरा बभूव तारका श्रियः
सर्वदोत्तमो भवान् विराजते श्रिया तथा।
दिव्यभव्यनव्यभोग्यधीवरप्रदानतः
साधवो भवन्ति सर्व एव भूतलोत्तमाः ॥ 12 ॥

## हस्तः

अस्तदोषसञ्चयस्समस्तमंगलप्रदः
हस्त एव शोभनः सुदर्शनः सुधासितः।
अस्तु सूक्तिबन्धुरस्सुबन्धनोऽभयप्रदः
श्रेयसे महीयसे तनीयसो ममानिशम्॥ 13॥

## चित्रा

अश्वमेधमानमद्य चित्रकर्मणा युतं
लोकसंग्रहाय साधु भासमानमद्भुतम्।
भातिभातचित्रया विचित्रया मया युतं
शीतभानुमन्वहं श्रयेऽश्वकन्धरं महः॥ 14॥

## स्वाति

दिव्यधाम सोमभासि सामगीतमद्भुतं
स्वातिभूतिमन्महत्स्वभावभूतिकारणम्।
स्वातिदानतो विराजमानमस्वदेहिनां
स्वातिशायिधीप्रदं समाश्रये हयाननम्॥ 15॥

## विशाखा

तारकाधिनाथया विशाखया गृणन्ति ये
तारयामि तानहं स्वशाखया कुतूहलात्।
कारयामि सत्कृतिं निवारयाम्यघादमुं
तारवाचमेवमेव भावये हयाननम्॥ 16॥

## अनुराधा

तारयानुराधयानुभूतमात्मशर्मदं
धारया समाधिसंगियोगिभिर्विलोकितम्।

धारया हयाननं हृदापराधनाशनं
धारयामि धीविलासकारिधातृदेशिकम् ॥ 17 ॥

## ज्येष्ठा

ज्येष्ठया विलोकितो न शर्मणा समेधते
श्रेष्ठतां समश्नुते न चैव साधु भूतले।
श्रेष्ठमिष्टदैवतं प्रकृष्टवेदबोधकं
ज्येष्ठमेव वाजिकन्धरं महस्समाश्रये ॥ 18 ॥

## मूलम्

मूलकारणी परावरा वरेण्यदेवता
कूलयापिनी भवाब्धितो निमज्जतो जनान्।
स्थूलसूक्ष्मदृष्टितः पदाश्रितावनी सतां
कापि भाति काञ्चनी हयाननाभिधा सदा ॥ 19 ॥

## पूर्वाषाढा

पूर्वभद्रतारया समर्थिते पराक्रमे
सर्वभद्रवाचमेव नाशृणोत् कपिर्हतः।
शर्वमुख्यसर्वदेवशर्मजालदायिने
सर्वभद्रवाजिवक्त्रदैवताय ते नमः ॥ 20 ॥

## उत्तराषाढा

वैश्वदेवदेवताकतारकोदयश्रियं
विश्वमंगलं विशुद्धधीविलासकारणम्।
उत्तरोत्तराभिवृद्धिकारिवारिजेक्षणं
भावये तदुत्तमाभिसंस्तुतं हयाननम् ॥ 21 ॥

## श्रवणम्

तारका हरेर्यया यदीयनामकीर्तनं
तारकं सतामभीष्टकारकं श्रुतिप्रियम्।
पूरकं त्रिवर्गिणां मनोरथस्य यत्पदं
तारकं तुरङ्गमास्यदैवतं तदाश्रये॥ 22॥

## श्रविष्ठा

वारुणीयधोरणीं सभासु लब्धुमुत्तमां
वारुणश्रविष्ठया गरिष्ठतां यदीच्छसि।
कारणं द्रढिष्ठमस्ति सैन्धवाननं महत्
तारणं भवाम्बुधेर्भजस्व साधु सन्ततम्॥ 23॥

## शतभिषक्

शातकुंभलग्नशोभितारहारवक्षसं
शातिताघसंचयं शताभिधानशोभितम्।
आधिशातनं शतं भिषग्वरं समा वयं
संश्रयेम वाजिवक्त्रमक्षमेण शाश्वतम्॥ 24॥

## पूर्वप्रोष्ठपदा

पूर्वदेवनाशनं सुधीवरप्रियं हितं
श्रेष्ठवेदसारभूतमद्भुतं रसालयम्।
प्रौष्ठपद्यमस्तु संस्तुवानमानवप्रियं
हेषितं तुरङ्गमास्यदैवतस्य कांक्षितम्॥ 25॥

## उत्तरप्रोष्ठपदा

प्रौष्ठपद्यमुत्तरं सदा लभेय भूतले
शिष्टसंहितं लघिष्ठजन्तुजाततारकम्।

सौष्ठवादियुक्तमार्गनिष्ठशिष्टतुष्टिदं
प्रेष्ठमन्यदस्ति नैव वागधीश्वरादहो ॥ 26 ॥

## रेवती

रेवतीभरङ्गराजराजमानतारकं
साधुबृन्दसन्नुतं वरप्रदानविश्रुतम्।
गार्गिरीशसन्नुतं रमानिधिं हयाननं
सेवितुं यतेऽधुनैव गोप्तुमात्मसन्ततिम् ॥ 27 ॥

## अभिजित्

शश्वदश्वकन्धरस्य सेवनं ततोऽभिजित्
पश्वपत्यगेन दारपोषणं ततोऽभिजित्।
विश्वबन्धुरश्वबन्धुराशु कीर्त्यते यदा
विश्वतो जयं लभेत निश्चितं स विश्वजित् ॥ 28 ॥

श्रीनिवासराघवेण दिव्यदृष्टिमिच्छता
श्रीहयाननस्य पादपङ्कजं समर्चता।
चापलादियं कृतात्रिवंशजेन शोभना
भातु वाजिवक्त्रतारमालिका सतां मुदे ॥ 29 ॥

॥ इति श्रीलक्ष्मीहयवदननक्षत्रमालिका समाप्ता ॥